# Shri Tanatulasidasacharyapranitam Shriramapranama Ashtakam

# શ્રીતનતુલસીદાસાચાર્યપ્રણીતં શ્રીરામપ્રણામાષ્ટકં

## Document Information

Text title : Shri Tanatulasidasacharyapranitam Shriramapranama Ashtakam

File name : shrIrAmapraNAmAShTakaMtanatulasIdAsAchArya.itx

Category : raama, rAmAnanda, aShTaka

Location : doc_raama

Author : tanatulasIdAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

Shri Tanatulasidasacharyapranitam Shriramapranama Ashtakam

# શ્રીતનતુલસીદાસાચાર્યપ્રણીતં શ્રીરામપ્રણામાષ્ટકં

આદિર્યસ્ય તથા ચાન્તઃ ક્વચિચ્ચાપિ ન લભ્યતે ।
આદ્યન્તરહિતં બ્રહ્મ તં રામં પ્રણમામ્યહમ્ ॥ ૧॥

ઉપાદાનં નિમિત્તં ચ કારણં જગતોઽસ્ય યઃ ।
અદ્વિતીયં જગદ્ધેતું તં રામં પ્રણમામ્યહમ્ ॥ ૨॥

યસ્મિન્નિદં જગત્ સર્વં સર્વસ્મિન્ યશ્ચ વિદ્યતે ।
સર્વસ્યાન્તર્બહિર્વ્યાપ્તં તં રામં પ્રણમામ્યહમ્ ॥ ૩॥

અર્ચનાત્ કીર્ત્તનાદ્ યસ્ય ભવાબ્ધિસ્તીર્યતે સુખમ્ ।
સર્વેષાં તારકં બ્રહ્મ તં રામં પ્રણમામ્યહમ્ ॥ ૪॥

નૈયાયિકા વદન્તીશં કર્મ મીમાંસકાશ્ચ યમ્ ।
વેદાન્તવેદિનો બ્રહ્મ તં રામં પ્રણમામ્યહમ્ ॥ ૫॥

યસ્ય ભક્ત્યા પ્રપત્ત્યા વા સાયુજ્યં લભતે નરઃ ।
ત્રાતારં સ્વાશ્રિતાનાં ચ તં રામં પ્રણમામ્યહમ્ ॥ ૬॥

સ્વે સ્વે કાર્યે રતા દેવાઃ સન્તિ યસ્ય ભયાદિહ ।
નિયામકં ચ સર્વેષાં તં રામં પ્રણમામ્યહમ્ ॥ ૭॥

અમોઘં વન્દનં યસ્ય પૂજનં કીર્ત્તનં તથા ।
અમોઘસ્મરણં ચેશં તં રામં પ્રણમામ્યહમ્ ॥ ૮॥

શ્રી તનતુલસીદાસદ્વારપીઠેશનિર્મિતમ્ ।
ભવતાદષ્ટકં ચેદં પઠતાં સુખદં નૃણામ્ ॥ ૯॥

ઇતિ શ્રીતનતુલસીદાસાચાર્યપ્રણીતં શ્રીરામપ્રણામાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Tanatulasidasacharyapranitam Shriramapranama Ashtakam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*